# Shri Rama Pratahsmaranam

# શ્રીરામપ્રાતઃસ્મરણમ્

## Document Information

Text title : rAmaprAtaHsmaraNam 2

File name : rAmaprAtaHsmaraNam2.itx

Category : raama, suprabhAta, panchaka

Location : doc_raama

Author : Agastyamuni

Transliterated by : Rashmi R rashmirjois at gmail.com

Proofread by : Rashmi R rashmirjois at gmail.com, NA

Latest update : April 19, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# Shri Rama Pratahsmaranam

# શ્રીરામપ્રાતઃસ્મરણમ્

પ્રાતઃ સ્મરામિ રઘુનાથમુખારવિન્દં
    લમ્બાલકાવલિમધુવ્રતમુગ્ધશોભમ્ ।
મન્દસ્મિતાંશુમહનીયમરાલશોભં
    કારુણ્યપૂરિતકટાક્ષકૃતાર્તરક્ષમ્ ॥ ૧॥

પ્રાતઃ શ‍ૃણોમિ રઘુનાયકવાક્યજાલં
    દીનૌઘરક્ષણમહાવ્રતલબ્ધમૂલમ્ ।
શ્રોષ્યામિ યેન ન કથઞ્ચન કાલદૂત-
    વક્ત્રોદ્ધતં જહિ વિદારય તાડયેતિ ॥ ૨॥

પ્રાતર્ભજામિ રઘુનાયકવામહસ્તં
    કોદણ્ડદણ્ડપરિમણ્ડિતમદ્ભુતાભમ્ ।
યદ્દર્શનાદ્ધૃદયમાશરપુઙ્ગવાનાં
    સદ્યસ્સ્ફુટત્યખિલલોકજયોદ્ધતાનામ્ ॥ ૩॥

પ્રાતશ્શ્રયામિ રઘુનાયકદક્ષહસ્તં
    સાધુદ્રુહાં વિદલનોત્સુકબાણયુક્તમ્ ।
આર્તાભયાર્પણમહાવ્રતબદ્ધદીક્ષં
    દીનાલ્યભીષ્ટવરદાનસુધાશનદ્રુમ્ ॥ ૪॥

પ્રાતર્નમામિ રઘુનાથપદારવિન્દં
    દેવાસુરોરગમુનીન્દ્રમનુષ્યવન્દ્યમ્ ।
યત્સ્પર્શભાગ્યવશતો ભરતપ્રિયાર્થમ્ ।
    સામ્રાજ્યમાપ કિલ દારુ ચ પાદુકાખ્યમ્ ॥ ૫॥

ઇતિ અગસ્ત્યમુનિકૃતં શ્રીરામપ્રાતઃસ્મરણં સમ્પૂર્ણમ્ ।

॥ શ્રીરામશરણં મમ ॥

Encoded and proofread by Rashmi R rashmirjois at gmail.com

*Shri Rama Pratahsmaranam*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*